✧˖°*❋ ❋*°˖✧

# শ্রী বেংকটেশ্বর বজ্র কবচ স্তোত্রম্

# Sri Venkateswar Vajra Kavach Stotram

**in bangla**

✧˖°*❋ ❋*°˖✧

# ॥ শ্রী বেংকটেশ্বর বজ্র কবচ স্তোত্রম্ ॥

মার্কংডেয উবাচ

নারাযণং পরব্রহ্ম সর্ব-কারণ-কারণম্ ।
প্রপদ্যে বেংকটেশাখ্যং তদেব কবচং মম ॥ 1 ॥

সহস্র-শীর্ষা পুরুষো বেংকটেশ-শ্শিরোঽবতু ।
প্রাণেশঃ প্রাণ-নিলযঃ প্রাণান্ রক্ষতু মে হরিঃ ॥ 2 ॥

আকাশরা-ট্সুতানাথ আত্মানং মে সদাবতু ।
দেবদেবোত্তমো পাযাদ্দেহং মে বেংকটেশ্বরঃ ॥ 3 ॥

সর্বত্র সর্বকালেষু মংগাংবাজা-নিরীশ্বরঃ ।
পালযেন্মাং সদা কর্ম-সাফল্যং নঃ প্রযচ্ছতু ॥ 4 ॥

য এত-দ্বজ্রকবচ-মভেদ্যং বেংকটেশিতুঃ ।
সাযং প্রাতঃ পঠেন্নিত্যং মৃত্যুং তরতি নির্ভযঃ ॥ 5 ॥

**ইতি মার্কংডেয-কৃতং শ্রী বেংকটেশ্বর বজ্রকবচ-স্তোত্রং সংপূর্ণম্ ॥**

✧ₓ.....°*❋ ❋*°.....ₓ✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net